


HIS DIVINE HOLINESS

**PRAMUKH SWAMI MAHARAJ**

(SWAMI NARAYANSWARUPDAS)

BAPS

॥ श्री स्वामिनारायणो विजयते ॥

જય સ્વામિનારાયણ.

વિશેષ, આપના પત્ર દ્વારા વિગત જાણીને અત્યંત આનંદ થયો કે **સ્વર્ણિમ ગુજરાત** પર્વના ઉપક્રમે શ્રી સોમનાથસંસ્કૃત યુનિવર્સિટીએ **'સ્વર્ણિમ ગુજરાત સંસ્કૃત સંભાષણ યોજના'** અમલમાં મુકીને એક લાખ વિદ્યાર્થીઓને સંસ્કૃત સંભાષણમાં તૈયાર કર્યા છે.

સંસ્કૃત આપણી દેવભાષા છે. વિશ્વની આ સૌથી પ્રાચીન અને જીવંત ભાષા છે. હજારો વર્ષોથી આપણા મહાન ઋષિઓ, મહાન આચાર્યો, મહાન સર્જકોએ વિપુલ માત્રામાં અદ્‌ભૂત ગ્રંથો રચ્યા છે. આપણો એ મહાન વારસો સંસ્કૃતમાં છે. તેમાં આપણી હજારો વર્ષ પુરાણી ભારતીય સંસ્કૃતિનાં મહાન મૂલ્યો, મહાન વિભાવનાઓ, મહાન આધ્યાત્મિક માર્ગદર્શન અને મહાન ચરિત્રો ભંડારેલા છે. આપણી નવી પેઢીને જો સંસ્કૃતથી વંચિત રાખીશું તો તે ક્યારેય આપણા એ ભવ્ય પ્રાચીન વારસાને માણી શકશે નહી, કે તેનું વહન કરી શકશે નહી. આધુનિક સમયમાં આપણી સનાતન સંસ્કૃતિને તે સૌથી મોટું નુકસાન છે. માત્ર આપણી સંસ્કૃતિને જ નહી, પરંતુ સમગ્ર વિશ્વને તે એક મોટું નુકસાન છે. એવા કટોકટીના સમયે આપ સહુ વિવિધ સ્તરે વિદ્યાર્થીઓમાં સંસ્કૃત પ્રત્યે રસ-રૂચિ જગાવવાનો પુરુષાર્થ કરી રહ્યા છો, તે જાણીને ખૂબ જ આનંદ થયો. આપ **'સંસ્કૃત મહાકુંભ'** યોજીને દેવભાષા-ઉત્કર્ષનો સંકલ્પ કર્યો છે, તે બદલ ધન્યવાદ

મહાકુંભ સફળતા પ્રાપ્ત કરે, તેમાં ભાગ લેનાર સહુને વિશેષ પ્રેરણા પ્રાપ્ત થાય, આ અભિયાનમાં ઉત્તરોત્તર અધિક સફળતા પ્રાપ્ત થતી રહે એ જ ભગવાન શ્રી સ્વામિનારાયણ, સર્વે અવતારો, સર્વે મહાન આચાર્યો - સંતોને પ્રાર્થના.

શા. નારાયણસ્વરૂપદાસ

સ્નેહાશીર્વાદ આશીર્વાદ સહ,

**શાસ્ત્રી નારાયણસ્વરૂપદાસ (પ્રમુખસ્વામી મહારાજ)ના**

સ્નેહપૂર્વક જય સ્વામિનારાયણ.

પ્રતિ,
**પ્રા. શ્રી પંકજભાઇ જાની**
**કુલપતિશ્રી,** શ્રી સોમનાથસંસ્કૃત યુનિવર્સિટી, વેરાવળ.



Dr. Lalit Patel
Asst. Professor
Shree Somnath Sanskrit
University Sanchalit
Sanskrit College
Veraval

श्रीसोमनाथसंस्कृतयुनिवर्सिटी
न केवलं व्यक्तेः अपि तु
संपूर्णमानववंशस्य
निर्माणं करिष्यति, इतः
मानववंशस्य निर्माणं भविष्यति।
अयं विश्वविद्यालयः
मानववपनाय महाभियानस्य
प्रारम्भोऽस्ति।

- श्री नरेन्द्र मोदीजीमहोदयाः
माननीयाः मुख्यमन्त्रिणः, गुजरातम्

स्वर्णिम गुजरात
१९६० -२०१०

स्वर्णिम गुजरात
१९६० -२०१०

## • शुभेच्छा •



श्रीसोमनाथसंस्कृतविश्वविद्यालयः स्वर्णिम-गुजरातजयन्त्यवसरे स्वर्णिमगुजरातसंस्कृतसम्भाषण-योजनायां लक्ष्याधिकजनान् संस्कृतसम्भाषणं शिक्षितवान्। एतद् उपलक्ष्ये स्वर्णिमगुजरात-राष्ट्रियसंस्कृतमहाकुम्भस्य आयोजनं विश्वविद्यालयः करोति इति महतः हर्षस्य विषयः। संस्कृतमाध्यमेन निश्चप्रचं भारतीयसंस्कृतेः संरक्षणं भविष्यति इति मे विश्वासः।

- श्री रमणलाल वोरा

माननीयाः शिक्षामन्त्रिणः, गुजरातम्



श्रीसोमनाथसंस्कृतविश्वविद्यालयः स्वर्णिम-गुजरातजयन्त्यवसरे स्वर्णिमगुजरातराष्ट्रियमहाकुम्भस्य आयोजनं करोति इति ज्ञात्वा मोमुद्यते मे स्वान्तम्। तदर्थं अहं विश्वविद्यालयाय शुभकामनाः वितरामि। एषा संस्कृतयात्रा गुजरातप्रान्तात् संपूर्णभारतवर्षे प्रसरेत्। संस्कृतस्य गौरवं अनेन माध्यमेन वर्धिष्यति इत्यत्र नास्ति संदेहः इत्यहं मन्ये।

- प्रो. वसुबेन त्रिवेदी

माननीयाः राज्यकक्षायाः उच्चतकनिकीशिक्षामन्त्रिणः, गुजरातम्

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्
संस्कृतभारती - गुजरातम्

## स्वर्णिमगुज
## रातराष्ट्रियसंस्कृतमहाकुम्भः




# ॥ स्मरणिका ॥

डॉ. विष्णुः पुरोहितः
कुलसचिवः

॥ स्मरणिका ॥

स्मरणिका

## अनुक्रमणिका:

| अनुक्रमः | विषयः | पृष्ठक्रमाङ्कः |
| --- | --- | --- |
| १ | शुभाशंसनम् | ०१ |
| २ | स्वागतगीतम् | ०२ |
| ३ | गुर्जरधरे विभासि | ०३ |
| ४ | संस्कृत - संभाषण - प्रायोजना | ०४ |
| ५ | स्वर्णिम गुजरात - संस्कृतमहाकुम्भः | ०५ |
| ६ | स्वर्णिमगुजरातराष्ट्रियसंस्कृतमहाकुम्भस्य कार्यक्रमः | ०८ |
| ७ | श्रीसोमनाथविश्वविद्यालयकुलगीतम् | १७ |
| ८ | आराधयेम निजराष्ट्रम् | १८ |
| ९ | श्रृणु स्वर्णिमगुर्जरगाथाम् | १९ |

अनुक्रमणिका:

# शुभाशंसनम्

**प्रो. पंकज एल. जानी - कुलपतिः**

महतः प्रमोदस्य विषयोऽयमस्ति यत् श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम् स्वर्णिमगुजरातराष्ट्रियसंस्कृतमहाकुम्भस्यायोजनं करोति। तत्राप्येतदधिकोऽस्ति हर्षस्य विषयः यत् अस्य महाकुम्भस्योद्घाटनं माननीयानां गुजरातराज्यस्य मुख्यमन्त्रिणां श्री नरेन्द्रभाई मोदीजीमहोदयानां वरदहस्तैः भवति येषां सत्प्रयासेन सहयोगेन चाद्य संस्कृतभाषणदक्षाणाम् एकलक्षजनानां प्रतिनिधिभूतानां दशाधिकसहस्रजनानामत्र कुम्भेसमागमोभवति। महाकुम्भेयथा जनानां सम्मर्दः धार्मिकभावनायाः प्रकटीकरणाय मन्यतेतथैवात्र महाकुम्भेसंस्कृतभाषाव्यवहारकुशलानां समवायः उपस्थितो भवति तस्याः संस्कृतभाषायाः प्रायोगिकं स्वरूपं प्रकटीकरणाय।

अत्र कुम्भेभासनाट्यमहोत्सव-राष्ट्रियपरिसंवाद-संस्कृतयात्रा-युवकमहोत्सव- पत्रकारसंगोष्ठी-राष्ट्रियप्रतिस्पर्धा-राज्यस्तरीयप्रतिस्पर्धा-विद्वद्व्याख्यानानि च मुख्य आकर्षणस्य केन्द्राणि तु भविष्यन्ति एव, तैः सह एकः भारतीयसमाजः संस्कृतभाषां व्यवहरन् उपस्थितोभवतीति विशेषरूपेणोल्लेख्यः विषयः। एतान् उपर्युक्तान् सर्वान् विषयान् शब्दचित्रमाध्यमेन प्रस्तौतीयं स्मरणिका इति महतोहर्षस्य विषयः। एतदर्थमहं विश्वविद्यालयस्य पारिवारिकान् धन्यवादैः, आशीर्वचोभिश्च सभाजयामि येषाम् ''अहर्निशं सेवामहे'' - इति भावनया एषा स्मरणिका प्रकाशिता भवति।

**जयतु सोमनाथः। जयतु संस्कृतम्। जयतु भारतम्।**

***

# स्वागतगीतम्

सद्विश्वविद्यालयवरे श्रीसोमनाथे स्वागतम् ॥ध्रु०॥
ज्योतिर्मये वसुधातले सद्भारते सद्भारते
गुणवत्सुगुर्जरराज्यविद्याधाममुकुटे संस्कृते ।
श्रीमत्कनैयालालमुनशीकल्पनाङ्कुरसुरतरौ ॥ १ ॥...ध्रु०

'गौरवाय हि पूर्णते' ति ध्येयमन्त्रसुयन्त्रिता
विश्राम्यति स्वैरं सदास्मिन् शारदा सुरभारती
ज्ञानविज्ञानस्फुरज्ज्योतिर्द्वयं विलसतितरां ॥२॥...ध्रु०

सोमेन सोमरसेन सोमकरेण सोमेशेन वै
वेदैः षडङ्गैरखिलशास्त्रैः समकलाभिः संयुते ।
नित्यं हवनधूमावलीमन्त्रावलीभिर्निर्मले ॥३॥...ध्रु०

गुर्जरधुरन्धरवरसुनायकयत्नतः सुविनिर्मिते
प्राणप्रतिष्ठावति यथास्मिन् विश्वकर्मविकल्पिते
ज्ञानान्विते सन्मार्गदर्शकप्रेरणाजलसिञ्चिते ॥४॥...ध्रु०

वेदैः षडङ्गैरन्विते शास्त्रैः कलाभिर्भूषिते
सारस्वताः सुस्नातकानुस्नातकाश्छात्राश्च वः ।
वन्दनसुचन्दनहृदयजलपाद्यासनैः संस्कुर्महे ॥५॥...ध्रु०

***

# गुर्जरधरे विभासि

जय गुर्जरधरे ! विभासि।
या द्वारकेशयुतसोमनाथअम्बाजीधामविशाला
या नार्मदसारस्वतसाभ्रमतैः सलिलैः सततं पूता
या चोटीला-शत्रुंजय-पावागढगिरनारसुशैला
जय गुर्जरधरे ! विभासि।

या बृहदुपवनवनपक्षिपशूनामभयारण्यवरेण्या
सर्वधर्मसमभावसुमधुरा प्रकटितबान्धवभावा
या शिल्प-नाट्य-कविता-संगीते नित्यमाधुरीरसिता
जय गुर्जरधरे ! विभासि।

या धन्वन्तरिवत् शतधौषधिभिर्नानामृतघटहस्ता
या विश्वकर्मवत् स्वर्णचतुर्भुजमहामार्गनिर्मात्री
या कृषिगोरक्षावाणिज्यार्थं सर्वजनैः सुखसेव्या
जय गुर्जरधरे ! विभासि।

या हेमचन्द्र-सरदार-गान्धि-नरसिंह-दयानन्दार्या
या रक्षण-शिक्षण-दक्षिण-हृदयैः सन्नायकैः सुधन्या
या प्रतिगौर्जरजननिहितनिजांशा प्रतिबिम्बितजनहृदया
जय गुर्जरधरे ! विभासि।

***

# संस्कृत - संभाषण - प्रायोजना

संस्कृतं सर्वभाषाप्राचीनम्, भारतीय संस्कृतेः सर्वस्वञ्चेति न तिरोहितम्। अतः एतत् सर्वं ध्यानेऽवस्थाप्य गुजरातप्रान्तः श्री सोमनाथसंस्कृतयुनिवर्सिटी विश्वविद्यालयं २००६ तमेइसवीय-वर्षेस्थापितवान्। एष विश्वविद्यालयः अद्य श्रीसोमनाथमन्दिरस्य पार्श्ववर्तिक्षेत्रेवेरावलनगरेराराजते। गुजरातराज्यस्योद्यमशीलयः राज्यसर्वकारस्य माननीयानां मुख्यमन्त्रिणांश्रीमतां नरेन्द्रभाईमोदीजी महोदयानां सर्वदैवैषः प्रयासोभवति यत् अस्माकं भारतीयसंस्कृतेः प्राणभूतं संस्कृतं लोकेषु प्रसारितं प्रचारितञ्च स्यात्। अतः अस्मिन्नेव सन्दर्भेसर्वकारपक्षात् लक्षजनानां संस्कृतसम्भाषणनैपुण्याय एका प्रयोजना श्रीसोमनाथ-संस्कृत-विश्वविद्यालयेन प्राप्ता। अत्र संस्कृतभारत्याः सहयोगेन कार्यक्रमोऽयं २००९ तमे वर्षे प्रारब्धः। अस्याः प्रायोजनायाः संचालनाय श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य मान्यानां कुलपतिवर्याणं आध्यक्षेएकस्याः समितेः रचनाऽभूत् या समितिः कार्यकारिणीपरिषदः विद्यापरिषदश्च मार्ग दर्शनिकार्यं कुर्वन्ती आसीत्। तदनुसारमेव श्री सोमनाथ संस्कृतविश्वविद्यालयः संस्कृत-भारती तथा च राज्यसर्वकारस्य संयुक्तोपक्रमेव्यवस्थितरूपेण प्रायोगिकं कार्यं कर्तुं २००९ तमवर्षष्य मार्चमासेगुजरातराज्यस्य महाविद्यालयानां शिक्षकेभ्यः, संस्कृतशिक्षकेभ्यः तथा चास्मिन् अभियाने स्वेच्छया आगन्तुकामानां जनानां कृतेपञ्च-सप्त-दिनात्मकः प्रशिक्षणकार्यक्रमः क्षेत्र-मण्डल-स्तरेषु आयोजितः येषु जलाराममन्दिरम् धर्मजं, शिशुमन्दिरम् कह्लोलम्, श्री नारायणसंस्कृत महाविद्यालयः पेटलाद-क्षेत्रम्, नीलकंठमहादेव नकलंगम्, अहमदावादः, लालनसरस्वतीधाम - सिद्धपुरम्, सी. के. शाह प्राथमिकविद्यालयः बांकानेरः भारती आश्रमः जुनागढम्, भीड-भंजन महादेवमन्दिरम् आणन्दः, सार्वजनिककेन्द्र महेसाणा, सूर्यपुरसंस्कृत महाविद्यालयः सूरत, एन. एस. पटेल आर्टसकोलेज आणन्द, पावोजेतपुर बडोदरा, सी. बी. आर्ट्स कोलेज नडियाद, आर्ट्स एवं कामर्स कॉलेज बालासिनोरः, बी. एड. कॉलेज आणन्दः, इति अन्यतमानि केन्द्राणि आसन्। यत्र शिक्षण-प्रशिक्षणवर्गामायोजनं संचालनञ्चाभूत्। एषु केन्द्रेषु विषयनिष्णातरूपेण संस्कृतभारत्याः एवं संस्कृतसंभाषणे निपुणैः शिक्षकैः संस्कृतसंभाषणप्रशिक्षणं दत्तम्। प्रायः द्विसहक्षशिक्षकाः संभाषणकेन्द्रचालनाय प्रशिक्षिताः बभूवुः। प्रशिक्षणकार्यक्रमेचत्वारिशत् (४०) घंटा-पर्यन्तस्य पाठ्यक्रमः संस्कृतेअध्यापनाय शिक्षणं तेभ्यः निष्णांतैः दत्तम् येन रुचिकरः पाठः प्रशिक्षुभ्यः स्यात्। अस्मिन् कार्यक्रमेषु माननीयाः श्री सोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतयः संस्कृतभारत्याश्चाधिकारिणः स्वयमेव उपस्थितिं विधाय मार्गदर्शनं दत्तवन्तः। अत्र आवास-भोजनादि व्यवस्था विश्वविद्यालयद्वारा जाता आसीत् तथैव पुरस्कारस्यापि व्यवस्था विश्वविद्यालयेनैव कृता आसीत्।

अतश्च विश्वविद्यालयद्वारा निर्मितं संस्कृत संभाषणम्, इति पुस्तकं तथा च संस्कृतभारतीद्वारा निर्मितम् अस्मिन् सन्दर्भेव्यवहारसाहस्रीति पुस्तकं निःशुल्करूपेण प्रशिक्षुभ्यः वितरितमासीत्।

अस्मिन् कार्यक्रमे प्रशिक्षकाणां कृते प्रतिप्रशिक्षकं द्विसहस्रात्मकं द्रव्यं गौरवपुरस्कार रूपेण निर्धारितमासीत्।

अतः अस्यैव पूर्णता स्वर्णिमगुजरातराष्ट्रियसंस्कृत-महाकुंभ-कार्यक्रमरूपेण दिसम्बरमासस्य तृतीयतारिकातः प्रारप्स्यतेयत्र क्रमेण भास-नाट्यमहोत्सवः, राष्ट्रियपरिसंवादः, युवकमहोत्सवः पत्रकारसंगोष्ठी, राष्ट्रियसंस्कृतवाक् प्रतिस्पर्धा, संस्कृतसंभाषणप्रतिस्पर्धा-निदर्शनम् च तथा क्विज्, वांचेगुजरात - इत्यादि कार्यक्रमाः अनुष्ठेयाः सन्ति, यत्र भारतस्य संस्कृतविश्वविद्यालयानां माननीयाः कुलपतयः, विद्वांसः, छात्राश्चाहूताः सन्ति। तथैव विशेषरूपेण गुजरातराज्यस्य संस्कृतमहाविद्यालयानां प्राचार्यप्रभृतयः विद्वांसः श्री सोमनाथसंस्कृत-विश्वविद्यालयस्य पावनेपरिसरेसमवायी भूताः भविष्यन्ति। अत्र शैक्षणिककार्यक्रमेषु नाट्याभिमञ्चनं, यत् संवादेविदुषां व्याख्यानं, संस्कृतप्रदर्शन्यादि प्रेक्षणीयाः श्रव्याश्च मनोरमाः कार्यक्रमाः भविष्यन्ति।

परिसंवादस्य विषयोऽस्ति - ''संस्कृतवाङ्मयम् एवं समाजः'' वाक्प्रतिस्पर्धायाः विषयश्च ''राष्ट्रनिर्माणं प्रति संस्कृतस्य भूमिका।'' अत्र कार्यक्रमे मन्ये १२ सहस्रपरिमिताः जनाः आगमिष्यन्ति।

कार्यक्रमस्योद्घाटनं माननीयैः गुजरातराज्यस्य मुख्यमन्त्रिवर्यैः श्री नरेन्द्रभाई मोदी महोदयैः विधास्यते। कुंभोऽयं दिसम्बरमासस्य ३ तारिकातः ५ तारिकां यावत् चलिष्यति।

अस्य सफलतायै भगवान् सोमनाथः प्रार्थ्यते।

***

## स्वर्णिम गुजरात - संस्कृतमहाकुम्भः

श्रीसोमनाथ-संस्कृत-युनिवर्सिटी एकलक्षजनानां संस्कृतसंभाषणयोजनाया: प्रारंभं २००९ ईसवीय वर्षस्य मार्च मासे स्वर्णिम गुजरातमहोत्सवप्रसंगेचकार। अस्माकं देशस्य प्रथमोऽयं प्रशस्तः प्रयासः संस्कृत प्रचारप्रसारप्रसंगे वर्तते, यत्र विशेषरुपेण गुजरातराज्यसर्वकारः प्रशंसनीयः तत्रापि माननीयमुख्यमन्त्रिणः अतिशयरुपेणाभिनन्दनीयाः सन्ति येषां साहाय्येन, उत्साहवर्धनेन चैषः संस्कृतसंभाषण कार्यक्रमः सम्यक्रुपेण सम्पन्नः। अत्र भवतां श्रीमतां मुख्यमन्त्रिणामेषा डिण्डिम घोषणा वर्तते यत् अस्माकं संस्कृतभाषायां संस्कृतस्य विपुले साहित्येच ज्ञानविज्ञानानां बाहुल्यमस्ति, येषां विषयेआधुनिकतकनीकीमाध्यमेन शोधः कर्तव्यः विश्वजनताभद्राय। वेदात् बेबसाईटपर्यन्तस्य, उपनिषदः उपग्रह - विज्ञानपर्यन्तस्याध्ययनं सम्यग् विधाय विश्वजनकल्याणाय किञ्चिदस्माभिर्भारतीयैः अवश्यमेव दानाया प्रयतनीयम्। इति तत्र भवतामुपदेशः।

अतः स्वर्णिमगुजरातसंस्कृतमहाकुम्भः यः गुजरातराज्यस्य, साहाय्येनानुष्ठीयते, श्री सोमनाथसंस्कृतविश्वविद्यालयपरिसरे, तत्र विशेष- उद्यमोऽस्ति माननीयानां कुलपतिवर्याणां प्रो. पंकज एल. जानीमहोदयानां तथा च संस्कृत-भारतीतिसंस्थायाः अधिकारिणाम्। अत्र सर्वैः सह विश्वविद्यालयीय-सदस्यानां गुजरातप्रदेशस्य संस्कृतविदूषां, प्रजानां, प्रशासकानाञ्च सौहार्देन, सहयोगेन च ३ दिस. तः ५ दिसम्बर २०१० पर्यन्तमेष महाकुम्भ सम्पाद्योऽस्ति, यत्र सम्पूर्णो हि संस्कृतः समाजः भारतस्य संस्कृत-गंगास्नानं करिष्यति। अत्रानुष्ठेयैः कार्यक्रमैः संस्कृत-वाङ्मयस्य प्रायोगिकरूपं मनोहरं च रूपं चित्रितं भविष्यति। अस्य कार्यक्रमाणां विवरणमत्रास्ति प्रस्तुतम् -

### स्वर्णिमगुजरातराष्ट्रियसंस्कृतमहाकुम्भस्य कार्यक्रमारम्भः

श्रीसोमनाथ-संस्कृत-युनिवर्सिटी, वेरावल परिसरे २०१० ईसवीयवर्षस्य तृतीयतारिकायां स्वर्णिम गुजरातराष्ट्रियसंस्कृतमहाकुंम्भस्य कार्यक्रमाणां शुभारम्भः गुजरातराज्यस्य माननीयमुख्यमन्त्रिणां श्री नरेन्द्रभाई मोदीजी महोदयानां करकमलैः भविष्यति, यत्र सर्वकारस्य माननीयाः शिक्षामन्त्रिणः श्री रमणलाल वोराजीमहोदया प्रो. वसुबेन त्रिवेदीजीमहोदया, वित्तमन्त्रिण श्री वजुभाई वाळाजीमहोदयाः तथा चान्येविशिष्टाः विद्वांसः संस्कृतस्य उपस्थिताः भविष्यन्ति।

अस्मिन् एव दिवसेऽपराह्णे कविसम्मेलनमप्यनुष्ठेयमस्ति यत्र संस्कृतस्य कविषु प्रो. राधावल्लभ त्रिपाठीजी, प्रो. हरेकृष्ण शतपथीजी, डॉ. गौतमभाई पटेलजी, प्रो. जयप्रकाश ना. द्विवेदीजी, प्रो. श्रीनिवास रथजी, डॉ. बलदेवानन्दसागरजी, डॉ. रमाकान्त झाजी , पं. वसन्त गाडगिलजी, प्रो. रामकरणशर्माजी, डॉ. नरेन्द्रकुमार पण्ड्याजी, श्री रामकिशोर त्रिपाठीजी प्रभृतयः कवयः स्वकीयकाव्यैः सहृदयान् जनान् मुग्धान् करिष्यन्ति। अस्य कार्यक्रमस्य अध्यक्षतां प्रो. वाचस्पति उपाध्यायजीमहोदयाः करिष्यन्ति तथा च तत्र डॉ. मिथिलाप्रसाद त्रिपाठिनः, श्री भाग्येशभाई झा जी, डॉ. रमाकान्त शुक्लजी, डॉ. अभिराजराजेन्द्र मिश्रजी, डॉ. पी. एन. शास्त्रिजी तथा डॉ. राजेन्द्र नाणावटीजीमहोदयाः अपि काव्यपाठगौरवं प्रदर्शयिष्यन्ति। मञ्चसंचालकाः डॉ. हर्षदेव माधवजी महोदयाः भविष्यन्ति, तथा चात्र विशिष्टोपस्थितिर्भविष्यति प्रो. पंकज एल. जानीजी महोदयानाम् (कुलपतयः श्री सो. सं. युनि.) अनुष्ठेयेषु अन्य कार्यक्रमेषु श्रीसोमनाथसंस्कृतयुनिवर्सिटी - वेरावलम् तथा राष्ट्रियसंस्कृतसंस्थानम् - नवदेहली मानितविश्वविद्यालययोः संयुक्तोपक्रमेभासनाट्यमहोत्सवस्यायोजनं दि. ३, ४, ५ दिस. २०१० दिवसेषु भविता, यत्र

नाटककारस्य भासस्य दरिद्रचारूदत्त-दूतवाक्य - कुमारसंभव - मध्यमव्यायोग - कर्णभार - बालचरित - उरुभङ्ग-स्वप्नवासवदत्त - प्रतिमानाटक - दूतघटोत्कच - सुयोधन - इति नाटकानामभिमञ्चनं भविष्यति। प्रि. श्री गिरीशभाई ठाकरजीमहोदयस्य निर्देशनेउरुभङ्गमिति नाटकस्य विशिष्टा प्रस्तुतिर्भविता। अत्र सन्दर्भेसम्पूर्णभारतवर्षस्य ये संस्कृतविश्वविद्यालयाः, संस्कृतमहाविद्यालयाश्च गुजरातराज्यस्य सन्ति ते सर्वेप्रायशः आगत्य स्वनाट्यकलायाः निदर्शनं प्रस्तोष्यन्ति। कथाप्रस्तुतिं करिष्यन्ति प्रो. अजितभाई ठाकोरजी महोदयाः, डॉ. मणीभाई प्रजापतिजी महोदयाः, डॉ. महेश शाहजी महोदयाश्च।

अस्य भासनाट्यमहोत्सवस्योद्घाटनं प्रो. राधावल्लभ त्रिपाठिभिः (कुलपतयः, राष्ट्रियसंस्कृतसंस्थानम् - नवदेहली) करिष्यते- यत्र कायक्रमेप्रो. नीलकण्ठपतिजीमहोदयाः (कुलपतयः, श्री जनन्नाथसंस्कृतविश्वविद्यालयस्य) अध्यक्षस्थानेभविष्यन्ति तथैव च सारस्वतविशेषाः भविष्यन्ति डॉ. रामकरण शर्माजी महोदयाः (अध्यक्षाः, अन्ताराष्ट्रिय-संस्कृतविद्यासमवायः) डॉ. श्रीनिवास रथजी महोदयाश्च (उपाध्यक्षाः, महर्षि सान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी)। अत्र विशिष्टोपस्थितिरस्ति प्रो. पङ्कज एल. जानीजी महोदयानां (कुलपतयः श्री सोमनाथ संस्कृत युनिवर्सिटी, वेरावलम्) डॉ. गौतमभाई पटेलजी महोदयानाम् (पूर्वाध्यक्षाः, गुजरात संस्कृत अकादमी)

अस्यैव राष्ट्रिय-संस्कृत-महाकुम्भस्याङ्गत्वेन द्वितीयः कार्यक्रमः राष्ट्रियपरिसंवादस्य वर्तते, यस्य विषयोऽस्ति ''संस्कृत वाङ्मयम् एवं आधुनिक समाजः''। अत्र परिसंवादे सम्पूर्णदिशस्य ६० विद्वांषः शताधिकाः अध्यापकाः आगमिष्यन्ति। अस्मिन् निर्धारिते विषये विदूषां विचारमंथनं, पत्रवाचनम्, व्याख्यानञ्च दिस. मासस्य ३ एवं ४ तारिकयोः (२०१०) भविष्यति - यत्र प्रो. गौतमभाई पटेलजी महोदयाः, प्रो. दिलीपवेदालंकारजी (शिकागो) महोदयाः, प्रो. राजेन्द्र नाणावटीजी महोदयाः, प्रो. कलानाथ शास्त्रिजी महोदयाः, प्रो. ताराशंकर पाण्डेयजी महोदयाः (जयपुर) प्रो. मिथिलाप्रसादजी महोदयाः (उज्जैन), डॉ. रामराज उपाध्यायजी महोदयाः, (दिल्ली) डॉ. विनोदजी शर्मा (जयपुर) महोदयाः आध्यक्ष्यत्वेन व्याख्यानेन च प्रासंगिकंविषयं स्पष्टीकरिष्यन्ति।

अत्रैव प्रसंगे ४/१२/२०१० दिवसे संस्कृतपत्रकार-संगोष्ठी चाऽपि भविष्यति यत्र सत्राध्यक्षाः सन्ति पं. वसन्त गाडगिलजी महोदयाः (कार्याध्यक्षाः सम्पादकाश्च शारदाज्ञानपीठम् - संस्कृतपत्रिका, पुणे) विशिष्टातिथयः सन्ति अस्याः संगोष्ठ्याः डॉ. रमाकान्त शुक्लजी (उपाध्यक्षाः, अखिलभारतीयसंस्कृतपत्रकारसंघः) महोदयाः, डॉ. जनार्दन हेगडेजी (सम्पादकाः, संस्कृतसंभाषणसन्देशः एवं अ. भा. कार्यकारिणीसदस्याः, संस्कृतभारती) प्रो. पंकज एल. जानीजी (माननीयाः कुलपतयः - श्री सो. सं. युनि. वेरावलम्) महोदयाः विशेषरुपेण उपस्थिताः तत्र संगोष्ठ्यां भविष्यन्ति। सारस्वतविशेषरूपेणात्रोपस्थिताः भविष्यन्ति डॉ. बलदेवानन्दसागरजी महोदयाः, सौ. सुधा वसन्त गाडगिलजी महोदयाः।

अत्र संगोष्ठ्यां संस्कृतपत्रकारितासन्दर्भे सर्वेपक्षाः संस्कृतस्य परिशीलिताः भविष्यन्ति विषय विशेषज्ञैः येषु -

(१) संस्कृत - पत्रकारिता माध्यमेन संस्कृतस्य प्रचारः

(२) संस्कृतपत्रकारितायाः इतिहासः, विकासः, वर्तमानस्थित्यादिविषयाः।

(३) संस्कृत - पत्रकारितायां काठिन्यम्, समाधानं च।

(४) संस्कृत - पत्रकारितायाः सामाजिकमान्यता, तस्मिन् कर्मणि जीविकावृत्ति - संभावना इत्यादिविषयाः।

अस्मिन् एव सन्दर्भे संस्कृतच्छात्राणां संस्कृतशास्त्रार्थदक्षताप्रदर्शन - परीक्षणार्थं राष्ट्रिय वाक्प्रतिस्पर्धा आयोजिता वर्तते- यस्य विषयोऽस्ति ''राष्ट्र-निर्माणं प्रति संस्कृतस्य भूमिका। तथैव श्लोकोच्चारणप्रतिस्पर्धा संस्कृतगीतप्रतिस्पर्धा चापि मन्येछन्दोबद्धश्लोकानां महत्व-ख्यापनाय, कवित्वबीजस्थापनाय च छात्रेषु भविष्यति।

एतदतिरिक्तं 'राष्ट्रिय-संस्कृत-संस्थानस्य, दर्शनं संस्कृत - महाविद्यालयस्य च सहयोगेन श्री सोमनाथ-संस्कृत-युनिवर्सिटी - संचालित - संस्कृत - कोलेज इत्यस्य कार्यक्रमेषु अखिलगुजरात-संस्कृतसम्भाषणम् एवं शलाकाप्रतियोगिता च समायोजनीयेस्तः, तथैव युवकमहोत्सवस्य क्रीडादिप्रतिस्पर्धाः अनुष्ठेयाः सन्ति यत्र गुजरातराज्यस्य संस्कृतं प्रति रुचिशीलाः युवानः, परम्परागत-संस्कृत - महाविद्यालयीयाश्च छात्राः स्वां-स्वां प्रतिस्पर्धिनीं प्रतिभां प्रदर्शयिष्यन्ति संस्कृतस्य व्यावहारिकत्वं प्रमाणयितुम्। अत्रैव शास्त्रीयवाक्प्रतिस्पर्धाः भविष्यन्ति।

✼ **तत्र विषयाः सन्ति -**

(१) साहित्यशास्त्रम्।
(२) न्यायशास्त्रम्
(३) शलाकाप्रतियोगिता
(४) व्याकरणशास्त्रम्
(५) धर्मशास्त्रम्
(६) ज्योतिषशास्त्रम्
(७) मीमांसाशास्त्रम्
(८) सांख्यशास्त्रम्
(९) वेदान्तशास्त्रम्
(१०) समस्यापूर्तिः
(११) अष्टाध्यायीकंठपाठः
(१२) श्लोकान्त्याक्षरी।

एतेषां कार्यक्रमाणां आयोजनं दिस. मासस्य ४,५ (२०१०) तारिकयोः भविष्यति।

✼✼✼

## श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्
## स्वर्णिमगुजरातराष्ट्रियसंस्कृतमहाकुम्भः
३, ४, ५ दिसम्बर, २०१०

**दिनाङ्कः -** २ दिसम्बर - २०१०, गुरुवासरः

**स्वर्णिमगुजरातसंस्कृतयात्रा**

**समयः -** १४.०० वादनतः १७.३० वादनं यावत्
**स्थलम् -** वेरावलनगरम्

**दिनाङ्कः -** ३ दिसम्बर - २०१०, शुक्रवासरः

**श्रीनरनारायणदेवयज्ञशालायाः अनावरणविधिः**

**समयः -** ९.०० वादने
**उद्घाटकाः -** **श्रीरमणलाल वोराजीमहोदयाः**
(माननीयाः शिक्षामन्त्रिणः, गुजरातराज्यम्)
**प्रेरणामूर्तयः -** प.पू. सद्गुरु महंत शास्त्री स्वामी आत्मप्रकाशदासजीमहाभागाः
**विशिष्टपस्थितिः -** प.पू. स्वामीश्री श्यामनारायणाचार्यजीमहाभागाः,
खोरासा (तिरुपतिः)
**स्थलम् -** विश्वविद्यालयपरिसरः

**उद्घाटनसमारोहः**

**समयः -** ११.०० वादने
**अध्यक्षाः उद्घाटकाश्च -** **श्री नरेन्द्र मोदीजीमहाभागाः**
(गुजरातराज्यस्य माननीयाः मुख्यमन्त्रिणः)
**अतिथिविशेषाः -** **श्री रमणलाल वोराजीमहोदयाः**
(माननीयाः शिक्षामन्त्रिणः, गुजरातम्)
**श्री वजुभाई वाळाजीमहोदयाः**
(माननीयाः वित्तमन्त्रिणः, गुजरातम्)
**प्रो. वसुबेन त्रिवेदीजीमहोदयाः**
(माननीयाः राज्यकक्षायाः उच्चतकनिकीशिक्षामन्त्रिणः,
गुजरातम्)
**श्री राजसीभाई जोटवाजीमहोदयाः**
(माननीयाः विधानसभासदस्याः, सोमनाथ, गुजरातम्)
**सारस्वतविशेषाः -** **प्रो. राधावल्लभ त्रिपाठीजीमहोदयाः**
(कुलपतयः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली)
**प्रो. कमलेश जोशीपुराजीमहोदयाः**
(कुलपतयः, सौराष्ट्रयुनिवर्सिटी, राजकोटम्)

| | |
|---|---|
| | **प्रो. वाचस्पति उपाध्यायजीमहोदयाः** |
| | (कुलपतयः, श्रीलालबहादुरशास्त्रि-राष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली) |
| | **प्रो. हरेकृष्ण शतपथीजीमहोदयाः** |
| | (कुलपतयः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः) |
| | **श्री चमूकृष्ण शास्त्रीजीमहोदयाः** |
| | (अखिलभारतीयमहामन्त्रिणः, संस्कृतभारती) |
| **सारस्वतविशेषाः -** | **प्रो. नीलकण्ठपतिजीमहोदयाः** |
| | (कुलपतयः, श्री जगन्नाथसंस्कृतविश्वविद्यालयः, जगन्नाथपुरी) |
| **स्थलम् -** | विश्वविद्यालयपरिसर, |

## प्रदर्शनी उद्घाटन-विधिः

| | |
|---|---|
| **समयः -** | १३.३० वादने |
| **उद्घाटकाः -** | **श्री नरेन्द्र मोदीजीमहोदयाः** |
| | (गुजरातराज्यस्य माननीयाः मुख्यमन्त्रिणः) |
| **प्रदर्शन्यः -** | वेदप्रदर्शनी |
| | वास्तुज्योतिषप्रदर्शनी |
| | संस्कृतसंगणकप्रदर्शनी |
| | योगप्रदर्शनी |
| | संस्कृतविज्ञानप्रदर्शनी |
| | वस्तुप्रदर्शनी |
| | महाविद्यालयप्रदर्शनी |
| | संस्कृतग्रामः |
| | आयुर्वेदप्रदर्शनी |
| | परशुरामविद्याप्रदर्शनी (मार्शल आर्ट्स) |
| | सोमनाथट्रस्टप्रदर्शनी |
| | गुजरातस्य ज्यातिर्धराणां प्रदर्शनी |
| | प्राच्यविद्यामंदिरप्रदर्शनी |
| | के. का. शास्त्रीजीप्रदर्शनी |
| | यात्राधामप्रदर्शनी |
| **स्थलः -** | विश्वविद्यालयपरिसरः |

## पुस्तकमेला

- श्रीसोमनाथसंसकृतयुनिवर्सिटी-प्रकाशनम्
- संस्कृतभारती-प्रकाशनम्
- प्राच्यविद्यामंदिर - प्रकाशनम्

- संस्कृतसेवासमितिप्रकाशनम्
- पार्श्व-प्रकाशनम्
- सरस्वतीपुस्तकप्रकाशनम्
- गीताप्रेस-गोरखपुरप्रकाशनम्

**स्वर्णिमगुजरातसंस्कृतसम्भाषणछात्राणां स्पर्धाः**

| क्रम | कार्यक्रमः | स्थलम् | समयः | संयोजकः |
|---|---|---|---|---|
| १ | 'अवनितलम्' इति सामूहिकगीतम् | मुख्यमञ्चः | १४.०० | --- |
| २ | 'वयं कुर्म राष्ट्राराधनम्' इति गीतप्रस्तुतिः (दर्शनम् महाविद्यालयच्छात्रैः) | ,, | १४.१५ | --- |
| ३ | संस्कृत रास-गरबा स्पर्धा | ,, | १४.३० | प्रा. ललित पटेलः |
| ४ | संस्कृत लघुनाटक स्पर्धा | चोकसी कोलेज, वेरावलम् | १४.३० | प्रा. पंकजभाई रावलः |
| ५ | संस्कृत संवाद स्पर्धा | ,, | १४.३० | प्रा. डाह्याभाई मोकरिया |
| ६ | एकपात्रीयाभिनय स्पर्धा | अंकुर विद्यालयः, वेरावलम् | १४.३० | प्रा. शत्रुघ्न पाणिग्राही |
| ७ | समूहगान स्पर्धा | ,, | १४.३० | प्रा. भावप्रकाश गांधी |

**संस्कृतकविसम्मेलनम्**

अध्यक्षाः - **डॉ. कलानाथ शास्त्रिजीमहोदयाः**
(अध्यक्षाः, अर्वाचीनविज्ञानसङ्कायः, श्री ज. रा. सं. वि. जयपुरम्)

सारस्वतविशेषाः - **डॉ. मिथिलाप्रसाद त्रिपाठीजीमहोदयाः**
(अध्यक्षाः, महर्षिपतञ्जलिसंस्कृतप्रतिष्ठानम्, भोपाल)
**श्रीभाग्येभाई झाजीमहोदयाः (भा. प्र. से)**
(सचिवश्री, युवा, खेल, संस्कृतिकमन्त्रालयः गुजरातम्)
**डॉ. अभिराजराजेन्द्र मिश्रजीमहोदयाः**
(पूर्वकुलपतयः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी)
**डॉ. पी. एन. शास्त्रिजीमहोदयाः**
(निर्देशकाः, कालिदाससंस्कृतअकादमी, उज्जैन)
**डॉ. रमाकान्त शुक्लजीमहोदयाः**
(उपाध्यायः, अखिलभारतीयसंस्कृतपत्रकारसंघः)
**डॉ. राजेन्द्र नाणावटीजीमहोदयाः**
(पूर्वनियामकाः, प्राच्यविद्यामन्दिरम्, वडोदरा)

सञ्चालकाः - **डॉ. हर्षदेव माधवजीमहोदयाः**
(अध्यापकाः, श्री एच. के. आर्ट्स कॉलेज, अमदावादः)

संयोजकाः - डॉ. नरेन्द्रकुमार पण्ड्याजीमहोदयाः
समयः - १५.०० वादनतः १७.०० वादनं यावत्
स्थलम् - विश्वविद्यालयसभाकक्षः (शौनकभवनम्)

**राष्ट्रियपरिसंवादः**

स्थानम् :- श्रीमतीमणीबहेनकोटकविद्यालयः – वेरावलम्

**उद्घाटनसत्रम्**

दिनाङ्कः– ०३/१२/२०१०
समयः – २–०० तः ३–०० अपराह्णंयावत्
सत्राध्यक्षाः – प्रो.गौतमभाई पटेलजी
(पूर्वाध्यक्षाः गुजरातसंस्कृत अकादमी)
विशिष्टातिथयः – दिलीप वेदालंकारजी
सारस्वतविशेषाः राजेन्द्र नाणावटीजी
(पूर्वनियामकाः प्राच्यविद्यामंदिरम्, एम.एस.युनि.,वडोदरा)
विषयप्रवर्तनम्, स्वागतम्
मञ्चसंचालनम् च – प्रो.देवेन्द्रनाथ पाण्डेयः
(विभागाध्यक्षाः, वेदवेदाङ्गसङ्कायः,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्)

**प्रथमसत्रम्**

दिनाङ्कः – ०३/१२/२०१०
समयः – ०३–१० तः ०४–०० अपराह्णंयावत्
सत्राध्यक्षाः – प्रो.ताराशंकर पाण्डेयजी
विशिष्टातिथयः – श्रीरामकिशोरत्रिपाठीजी
(प्राचार्याः, श्रीवरतंतुसंस्कृतमहाविद्यालय, सोला – अहमदाबाद)
पत्रवाचनम् –
मञ्चसंचालनम् – प्रो.देवेन्द्रनाथ पाण्डेयः
(विभागाध्यक्षाः, वेदवेदाङ्गसङ्कायः,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्)

**द्वितीयसत्रम्**

दिनाङ्कः– ०३/१२/२०१०
समयः – ०४–१० तः ०५–०० अपराह्णंयावत्
सत्राध्यक्षाः – प्रो.कलानाथ शास्त्रीजी
(अध्यक्षाः, अर्वाचीनविज्ञानसङ्कायः, श्री ज.रा.सं.वि.–जयपुरम्)
विशिष्टातिथयः – डो.रश्मिबेन महेता
(प्राचार्याः, चोकसी आर्टस् एन्ड कोमर्स कोलेज, वेरावलम्)
पत्रवाचनम् –
मञ्चसंचालनम् – डो.गजेन्द्र पण्डाजी

## तृतीयसत्रम्

दिनाङ्कः– ०४/१२/२०१०
समयः – ०९–०० तः १०–४५ पूवाह्णे
सत्राध्यक्षाः – डॉ.रामराज उपाध्यायजी
(विभागाध्यक्षाः , पौरोहित्यम्, श्री ला. ब.शा. रा. सं. वि. , दिल्ली)
विशिष्टातिथयः – श्री कृष्णप्रसादः निरोलाजी
(प्राचार्याःब्र.सं. म. वि.,नडियाद
पत्रवाचनम् –
मञ्चसंचालनम् – कालिदासभाईजी
(प्राध्यापकः, श्रीवरतंतुसंस्कृतमहाविद्यालय, सोला – अहमदाबाद)

## चतुर्थम् सत्रम्
## पत्रकार संगोष्ठी

दिनाङ्कः – ०४/१२/२०१०
समयः – ११:०० तः १२:३०

## उद्घाटनम्

सत्राध्यक्षाः – पं.वसंतः गाडगिळजी
(कार्याध्यक्षाः सम्पादकाश्च शारदा–ज्ञानपीठम् संस्कृतपत्रिका, पूणे)
विशिष्टातिथिः – डॉ. रमाकान्त शुक्लजी
(उपाध्यक्षाः,अखिलभारतीयसंस्कृतपत्रकारसंघ)
डॉ. जनार्दन हेगडेजी
(सम्पादकाः, संस्कृतसंभाषण संदेशः एवम् अखिलभारतीयकार्यकारिणीसदस्याः, संस्कृतभारती)
विशिष्ट उपस्थितिः – प्रो. पंकज एल जानी
(माननीयाः कुलपतयः– श्री सो. सं. युनि. वेरावलम्)
सारस्वत विशेषाः– डॉ. बलदेवानन्द सागरजी
सौ. सुधा वसन्त गाडगिलजी
संचालनम्– प्रफुल्ल पुरोहितः

## पञ्चम सत्रम्

दिनाङ्कः– ०४/१२/२०१०
समयः – ०२–०० तः ०३–००
सत्राध्यक्षाः – डॉ.विनोद शर्मा
विशिष्टातिथिः – डॉ. राजेन्द्र चोटलिया
प्रो. मनसुखभाई मोलिया
डॉ. आर.एन. काथड

पत्रवाचनम् -

मञ्चसंचालनम् - भावप्रकाश गांधी
(श्री सो. सं. युनि. वेरावलम्)

**षष्ठंसत्रम्**

दिनाङ्कः- ०४/१२/२०१०
समयः - ०३-४५ तः ५-०० सायंयावत्
सत्राध्यक्षाः - प्रो.मिथिलाप्रसादजी
(अध्यक्षाः, महर्षिपतञ्जलिसंस्कृतप्रतिष्ठानम्, भोपाल )
विशिष्टातिथिः - श्री अजय ठाकर
(प्राचार्यः श्री डाकोर सं. म. वि. डाकोर)
पत्रवाचनम् -
मञ्चसंचालनम् - डॉ. शत्रुघ्न पाणिग्राही
(श्री सो. सं. युनि. वेरावलम्)

**भासनाट्यमहोत्सवः**

उद्घाटकाः - **प्रो. राधावल्लभ त्रिपाठीजीमहोदयाः**
(कुलपतयः, राष्ट्रियसंस्कृतसंस्थानम् - नवदेहली)
अध्यक्षाः - **प्रो. नीलकण्ठपतिजीमहोदयाः**
(कुलपतयः, श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, जगन्नाथपुरी)
सारस्वतविशेषाः - **डॉ. रामकरणशर्माजीमहोदयाः**
(अध्यक्षाः, अन्ताराष्ट्रियसंस्कृतविद्यासमवायः)
**डॉ. श्रीनिवासरथजीमहोदयाः**
(उपाध्यक्षाः, महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी, मध्यप्रदेशः)
विशिष्टोपस्थितिः - **प्रो. पङ्कज एल. जानीजीमहोदयाः**
(कुलपतयः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्)
**डॉ. गौतम पटेलजीमहोदयाः**
(पूवाध्यक्षाः, गुजरातसंस्कृत अकादमी)
सञ्चालकाः - **डॉ. नरेन्द्र एल. पण्ड्याजीमहोदयाः**
समयः - १७.०० वादने
स्थलम् - विश्वविद्यालयपरिसरः (मुख्यमञ्चः)

**नाट्यप्रस्तुतिः**

दरिद्रचारुदत्तम् - निर्देशिका - **डॉ. उमाबेन अनन्तानीजीमहोदयाः**
रसध्वनि, अहमदाबाद
कुमारसम्भवम् - (विशिष्टप्रस्तुतिः) निर्देशिका - **श्रीमती प्रज्ञा अगस्तीजीमहोदयाः**
दूतवाक्यम् - श्रीबाबडेश्वर संस्कृतमहाविद्यालयः, पोरबन्दरम्।

**भजनसंध्याकार्यक्रमः**

**प्रस्तुतिः -** श्री बाबडेश्वर संस्कृतमहाविद्यालयः, पोरबन्दरम्।
**समयः -** २१.०० वादने
**स्थलम् -** विश्वविद्यालयपरिसरः (मुख्यमञ्चः)

**दिनाङ्कः ४ दिसम्बर - २०१०**

**कार्यक्रमस्य रूपरेखा**

| क्रम | कार्यक्रमः | स्थानम् | समयः | संयोजकः |
|---|---|---|---|---|
| १ | युवकमहोत्सवः कूर्दनस्पर्धा एवं वोलीबोलस्पर्धा | विश्वविद्यालयस्य क्रीडाङ्गणम् | ०७.३० तः १०.०० | प्रा. भावप्रकाशः गांधी<br>प्रा. सुज्ञेश चुडासमा |
| २ | संस्कृतपरिसंवादः | मणिबेनकोटक हाईस्कूल-सभाखण्डः | ०९.०० तः ११.०० | डॉ. देवेन्द्रनाथः पाण्डेयः |
| ३ | युवकमहोत्सवः | आचार्यद्वितीयस्य वर्गखण्डः | १०.०० वादने | प्रा. ललितः पटेलः |
| ४ | संस्कृतसम्भाषण-एवं | विश्वविद्यालयः | १०.०० वादने | प्रि. मेहुलभाई भट्टः |
| | शलाका प्रतियोगिता | सभाखण्डः | | प्रा. पङ्कजभाई रावलः |
| ५ | संस्कृतप्रत्रकारसंगोष्ठी | मणिबेनकोटक सभाखण्डः | ११.०० वादने | डॉ. देवेन्द्रनाथ पाण्डेयजी<br>प्रा. प्रफुल्ल पुरोहितः<br>प्रा. अतुल उनागरः |
| ६ | संस्कृतविश्वविद्यालयानाम् अखिल-भारतीयवक्तृत्वस्पर्धा | चोकसी कोलेज | १४.०० वादने | प्रा. ललितः पटेलः |
| ७ | संस्कृतविश्वविद्यालयानाम् अखिल-भारतीयश्लोकगानस्पर्धा | चोकसी कोलेज | १४.०० वादने | प्रा. भावप्रकाश गांधी |
| ८ | संस्कृतविश्वविद्यालयानां अखिलभारतीय-एकपात्रीया अभिनयस्पर्धा | चोकसी कोलेज, वेरावलम् | १४.०० | प्रा. पंकजभाई रावलः |
| ९ | वांचेगुजरात अन्तर्गता चित्रस्पर्धा एव सुविचारस्पर्धा | विश्वविद्यालयस्य वर्गखण्डः | १५.०० | डॉ. डी. एम. मोकरीया |

स्वर्णिमगुजरातराष्ट्रियसंस्कृतमहाकुम्भस्य कार्यक्रमः

**भासनाट्यमहोत्सवः**

| | |
|---|---|
| **स्थानम् -** | श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम् |
| **समयः -** | १७.०० वादने |
| **मध्यमव्यायोगः -** | राष्ट्रियसंस्कृतविश्वविद्यापीठम्, तिरुपतिः |
| **कर्णभारम् -** | नाट्यविभागः, एम. एस. युनिवर्सिटी, वडोदरा, |
| | निर्देशकः - **डॉ. महेशशाहजी एवं डॉ. चारीजी** |
| **बालचरितम् -** | दर्शनम् संस्कृतमहाविद्यालयः, छारोडी |
| **उरुभङ्गम् -** | निर्देशकः - **डॉ. बलदेवानन्दसागरजी,** (जनरल सेक्रेटरी) (राष्ट्रियसंस्कृतपत्रकारसंघः, दिल्ली) |
| **स्वप्नवासवदत्तम् -** | चलचित्रप्रस्तुतिः, श्रीमती लीलाजी, (एम. एल. सी. कर्णाटिक) |

**सुन्दरकाण्डपाठः**

रात्रौ ०९.०० वादनेविश्वविद्यालयस्य मुख्यमञ्चोपरि

**भासनाट्यमहोत्सवः**

| | |
|---|---|
| **स्थानम् -** | श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम् |
| **समयः -** | १७:३० वादने |
| **प्रतिमानाटकम् -** | श्रीभागवतविद्यापीठम्, सोला |
| **दूतघटोत्कचम् -** | शिक्षाशास्त्रीमहाविद्यालयः, सोला |
| **सुमोधन -** | दूतवाक्यम् आधारित निर्देशकः |
| | श्रीहसमुख बाराडीजी, मीडीया सेन्टर, अमदावाद। |
| **उरुभङ्गम् -** | निर्देशकः - फाईन आर्ट्स कोलेज |
| | निर्देशकः - प्रि. गिरीशभाई ठाकरजी, पालनपुरम् |
| **स्वप्नवासवदत्तम् -** | निर्देशकः - निमेष देसाई वृन्दम् |

**भासकथा प्रस्तुतिः**

डॉ. महेशशाहजी, अध्यक्षः, नाटकविभाग - एम. एस. युनि., वडोदरम्
डॉ. मणिभाई प्रजापतिजी, पूर्वनियामकः, द्वारकाधीश संस्कृत विद्यापीठम्, द्वारका
प्रा. अजितभाई ठाकोरजी, विभागाध्यक्षः, एस. पी. युनिवर्सिटी, वल्लभविद्यानगरम्

**दिनाङ्कः - ५ दिसम्बर - २०१०**

## कार्यक्रमस्य रूपरेखाः

| क्रम | स्पर्धाः | स्थानम् | समयः | संयोजकः |
|---|---|---|---|---|
| १ | युवकमहोत्सवः (क्रीडास्पर्धाः) | विश्वविद्यालय- | ७:३० तः | प्रा. भावप्रकाश गांधी |
| २ | दोड, फेंक, वोलीबोल<br>वेरावल स्थानिक स्पर्धाः | परिसरः<br>विश्वविद्यालयस्य | १०:०० वादने<br>९:०० तः | प्रा. ललित पटेल |
| ३ | विद्यालयानाम्/महाविद्यालयानाम्<br>वेरावल स्थानिक स्पर्धाः | वर्गखण्डेषु<br>विश्वविद्यालयस्य | ०१:०० वादने<br>९:०० तः | प्रा. भावप्रकाश गांधी<br>प्रा. ललित |
| ४ | वक्तृत्वस्पर्धाः<br>संस्कृतसम्भाषण प्रतियोगिता एवं | सभाखण्डः<br>विश्वविद्यालयस्य | १०:०० वादने<br>१०:०० तः | प्रा. भावप्रकाश गांधी<br>प्रि. डॉ. नरेन्द्रकुमार पण्डया |
| ५ | शलाका स्पर्धा<br>(संस्कृतमहाविद्यालयानाम्)<br>युवकमहोत्सवः वक्तृत्व एवं | सभाखण्डः<br>चोकसी कोलेज | १:०० वादनं<br>१०:०० वादने | प्रि. श्री मेहुलभाई भट्ट<br>प्रा. पङ्कज रावल<br>प्रा. ललित पटेल |
| ६ | श्लोकगानस्पर्धा<br>स्वर्णिमगुजरातसंस्कृत | वेरावलम्<br>मुख्यमञ्चः | १५:०० वादने | प्रा. भावप्रकाश गांधी<br>प्रा. भावप्रकाश गांधी |
| | प्रश्नोत्तरीस्पर्धा | | | प्रा. ललित पटेल |

श्रीसोमनाथविश्वविद्यालयकुलगीतम्

## श्रीसोमनाथविश्वविद्यालयकुलगीतम्

**(युनिवर्सिटी गीतम्)**

सोमनाथेति पुण्याक्षरैः श्रीयुतो
विश्वविद्यालयो गुर्जरे राजते ॥ध्रु०॥

वेदगानेन कक्षा मुदा पूरिता
यज्ञधूमेन सर्व दिशश्छादिताः।
योगशिक्षादिभिः प्राङ्गणं शोभते
ब्रह्मविद्या सदा साधकैः साध्यते ॥१॥ ॥ध्रु०॥

मण्डिता मन्त्रपूता सुधर्मा सभा
यत्र वेदाङ्गवेदान्तदीप्ता प्रभा।
मन्दिरस्य व्यवस्थापनं शिक्ष्यते
चिन्तने चिन्तने नूतनं सृज्यते ॥२॥ ॥ध्रु०॥

रम्यपाथोनिधेर्गर्जना प्राङ्गणे
सङ्गणीया कला छात्रवृन्दे नवे।
शारदासन्निधिः सन्निधिर्वर्तते ॥३॥ ॥ध्रु०॥

''पूर्णता गौरवाये'' ति मुद्राङ्कितो
ज्ञानपुष्पान्वितः सत्क्रियाभूषितः।
यत्र भारं विना ध्येयलोभो भवेत्
संस्कृतेः सत्सुधा विद्यया लभ्यते ॥४॥ ॥ध्रु०॥

यत्र चाणक्यमेधा सदाऽध्यापने
पाणिनेस्तीव्रता कर्मयोगो हरेः।
व्यासबुद्धिर्यमो योगिनां लक्ष्यते
देशिकैर्दिव्यभाषा मुदा तन्यते ॥५॥ ॥ध्रु०॥

दिव्यबोधेन सद्गौर्जरी भासताम्
सौम्यसंस्कारयत्नैर्जनैर्भयताम्।
मन्त्रयन्त्रान्वितः शेवधिर्वर्धताम्
संस्कृतेनात्र नित्यं बुधैर्नन्द्यताम् ॥६॥ ॥ध्रु०॥

***

# आराधयेम निजराष्ट्रम्

(०) आराधयेम निजराष्ट्रम्
तनुजं हृज्जं धनजं
तनुहृद्धनजीवनजम्
आराधयेम निजराष्ट्रम्....(२)

(१) अन्तर्जं मुखजं कृतिजं, श्रद्धया च विनतशिरस्काः
निश्चलनिर्मलमतिभाजः
अभिवादयेम निजराष्ट्रम्....(२)

(२) निजसहासशैशवसहितम्, निजविकसद्यौवनसहितम्,
प्रौढिमयुतजीवनसहितम्, सम्पूजयेम निजराष्ट्रम्....(२)

(३) सम्पठ्यातीतं स्वीयम्, परिवृत्त्यैतिह्यं स्वीयम्
ज्ञात्वा भवितव्यं स्वीयम्
सम्पूजयेम निजराष्ट्रम्....(२)

(४) युगयुगजा वयं स्मरामो, प्रज्वलतीरनेकघटनाः
या मातुस्सेवार्यपथे, भूत्वाऽऽयाता दुर्दमनाः

(५) अस्माभिर्या स्वभिषिक्ता, जननीरिपुशोणितकुण्डैः
मण्डिता तथास्माभिर्या, जननी रिपुगणशतमुण्डैः
अस्माभिः प्रतिष्ठिता या, सांस्कृतिक उच्चवरपीठे
यत्रारूढा साऽऽकार्षीत्, अनुशशास निखिलं भुवनम्
अथ कालचक्रदुर्गत्या, तद्भग्नमुच्चवरपीठम्
निजतनुहृद्वसूनि दत्त्वा, आराधयेम निजराष्ट्रम्
आराधयेम निजराष्ट्रम्....(२)

***

# श्रृणु स्वर्णिमगुर्जरगाथाम्

पठ संस्कृत भाषां सरलाम्
श्रृणु स्वर्णिमगुर्जरगाथाम्,
हरितंवनराजिसुरम्यं
रुचिरंरक्षितमुर्जस्वि ।
तेजस्वि तपस्वि यशस्वि
श्रृणु स्वर्णिमगुर्जरगाथाम् .........पठ संस्कृत ......

सलिलंविमलंच सुपेयं
समये सम्प्राप्यमनल्पम् ।
ग्रामे क्षेत्रे नगरेषु
श्रृणु स्वर्णिमगुर्जरगाथाम्...... पठ संस्कृत ......

आवासाः शान्तिसुखेष्टाः
रमणीयाः शान्ताः दान्ताः ।
सद्धर्मसदाचारार्थाः
श्रृणु स्वर्णिमगुर्जरगाथाम् .........पठ संस्कृत ......

पन्थानो यत्र विशालाः
सुखदायकवाहनभव्याः
भुवि गगनविहारसमानाः
श्रृणु स्वर्णिमगुर्जरगाथाम्....... पठ संस्कृत .......

सबलंसफलं व्यक्तित्वं
जनता सच्छिक्षणदक्षा ।
व्यवसायः पारसुदर्शी
श्रृणु स्वर्णिमगुर्जरगाथाम् .........पठ संस्कृत ......

ग्रामे ग्रामे नगरेषु
कन्याः शिक्षणसंशीलाः ।
सर्वशिक्षणमभियानं
श्रृणु स्वर्णिमगुर्जरगाथाम्........ पठ संस्कृत ......

भूमिः सुखदा मातेव
मुद्रा-भरितश्च समुद्रः ।
देवराजो दिव्यदयालुः
श्रृणु स्वर्णिमगुर्जरगाथाम् .........पठ संस्कृत ......

नृपतिर्नृपनीतिसुदक्षः
निजराज्यप्रजासंरक्षः ।
श्रुतिपथगामी गुणरागी
श्रृणु स्वर्णिमगुर्जरगाथाम्.........पठ संस्कृत ......

ज्ञानंरक्षा जलमुर्जा
जनता इति पञ्चसुशक्तिः ।
पञ्चामृतपानसुपुष्टं
श्रृणु स्वर्णिमगुर्जरगाथाम् .........पठ संस्कृत ......

रचयिता –
डॉ. नरेन्द्रकुमार एल. पंडया

|| पूर्णता गौरवाय ||

स्वर्णिम गुजरात
१९६०-२०१०

''अस्माकं ध्येयम्''
''अस्माकं लक्ष्यम्''

## ''अस्माकं ध्येयम्''

गुणवत्तायां श्रेष्ठता तत् कस्यापि संघटनस्य आवश्यकतास्ति। श्रीसोमनाथसंस्कृतविश्वविद्यालयः तत्र अपवादरूपः नास्ति। अद्यतनीये स्वस्तनीये च स्पर्धात्मके विश्वस्मिन् स्थातुं वयं गुणवत्तायां लक्ष्यं केन्द्रितं कुर्मः। गुणवत्ता यात्रा अस्ति, अन्तिमं लक्ष्यं नास्ति।

## ''अस्माकं लक्ष्यम्''

(१) संस्कृतभाषायाः साहित्यस्य च विस्तृता प्रगतिः, अवबोधनं, विकासश्च।

(२) आधुनिकप्रवाहेण सह समन्वयं साधयित्वा परंपरागतरूपशिक्षायाः वेदानां ज्ञानं च सुदृढं करणीयं प्रोत्साहितं च कर्तव्यम्।

(३) योग्यनागरिकनिर्माणेन राष्ट्रनिर्माणम्।


(४) प्रौद्योगिक्याः महत्तमोपयोगने ज्ञानसमाजस्य निर्माणं कर्तव्यम्।

(५) नूतनप्रतिकारणां साम्मुख्यं करणीयम्। आजीविकायाः अवसरः उत्पादनीयः।

(६) संस्कृतस्य अभ्यासार्थं संशोधनकार्यार्थं च सुविधाः पूरणीयाः।

(७) समाजस्य निम्नवर्गेभ्यः च बालिकानां सहजप्रवेशः।

स्वर्णिम गुजरात
१९६० -२०१०




**श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्**
युनिवर्सिटी रोड, वेरावलम् - ३६२ २६६, जूनागढ, गुजरातम्
दूरभाषः - ०२८७६ २४४६३२, २४४५२८, २४४५२९, फेक्स - ०२८७६ २४४४१७